प्रको०। सप्तम्यर्थे त्रल् अयच्। उभयत्र द्वयोरित्यर्थे अव्य० "उभयत्रचरौ मुनीन्द्राः" जातकप०"द्वौ दैवे पितृकार्य्ये त्रीनेकैकमुभयत्र वा" छन्दो०। अह्नि द्युस् एद्युस् वा-अयच्। उभयद्युस् उभयेद्युस् च द्वयोरह्नोरित्यर्थे अव्य०। "यो अन्येद्युरुभयद्युरभ्येति" अथ०१,२५,४। "उभयेद्युस्तया प्राप्तौ परोपोष्या मनोषिभिः" स्मृतिः।

**उभय** त्रि० उभ+अयच्। द्व्यवयवे द्वित्वविशिष्टे अस्य द्वित्वबोधकत्वेऽपि एकबहुवचनान्ततयैव प्रयोगः न द्विवचनप्रयोगः। सि०कौ०। "उभयमानशिरे वसुधाधिपाः" रघुः। सर्वादि० सर्वनामकार्य्यम्। उभयस्मै उभयेषाम्। "यथा न उभयेषाममृत मर्त्यानाम्" ऋ०१,२६,८। जसि वा शी। उभये उभयाः। "परेऽवर उभया अमित्राः" ऋ०२,१२, १८। "ये जना उभये भुञ्जते विशः" २,२४,१०। "किं तत्साध्यं यदुभये साधयेयुर्न सङ्गताः" रघुः। स्त्रियां गौरा०ङीष्। "उभयीं सिद्धिमुभाववापतुः" रघुः।

**उभय(त्र)चर** पुंस्त्री०उभयत्र उभयोर्वा चरति चर–ट ३भूम्यन्तरिक्षचरे पक्षिभेदे स्त्रियां ङीप्। सूर्य्याक्रान्तराशेर्द्वादशद्वितीयस्थग्रहयोगभेदे स्त्री "सूर्य्याद्व्ययेऽपि च धने च तयोभयत्र संस्थैर्विना विधुमुशन्ति खगैस्तु योगान्। वेशीं च वोशिमुभयत्रचरीं मुनीन्द्राः स्पष्टं फलानि विविधानि वदन्ति तेषाम्" "समो राज्ञोभयचरीप्रभवो बहुभृत्यभाक्" जातकपद्धतिः।

**उभयतोदत्(न्त)** पुंस्त्री उभयतोदन्तः दन्तपङ्क्तिरस्य वा दत्रादेशः। उभयदन्तपङ्क्तियुक्ते मनुष्यादौ। "पशून् मृगान् मनुष्यांश्च व्यालांश्चोभयतोदतः" मनुः। स्त्रियां ङीप्। दत्रादेशाभावपक्षे तत्र वार्थे स्त्रियां वा ङीष्। "उभयतोदन्ताः प्रजाः प्रजायन्ते" शत०ब्रा० १,६,३,२,

**उभयतोमुख** त्रि० उभयतो मुखे यस्य। द्विमुखे घटादौ "उभयतोमुखाभ्यां पात्राभ्याम्" शत०ब्रा० ४,७,१,७, स्त्रियां स्वाङ्गत्वाभावे टाप् स्वाङ्गे तु ङीष्। उभयतोमुखी धेनुः। "यावत्तस्या रोमतुल्यानि युगान्युभयतोमुखी। दातास्याः स्वर्गमाप्नोति पूर्वेण विधिना ददत्। यावद्वत्सस्य पादौ द्वौ मुखं योनौ च दृश्यते। तावत् गौः पृथिवी ज्ञेया यावद्गर्भं न मुञ्चति" याज्ञ०उक्तो धेनुभेदः। अन्यत्र द्वयमेव उत्क्रान्तिसंज्ञयोक्ता। "उत्क्रान्ते तु प्रष्टस्य सुखोत्क्रान्तिसमृद्धये। तथ्यं संप्रददे नाम्ना गावमुत्क्रान्तिसंज्ञिताम्" विधा० पा० वह्नानमन्त्रः।

**उभयतश्शीर्ष्णी** स्त्री उभयतः शीर्षे यस्याः शीर्षन्नादेशः ङीष् अल्लोपः विसर्गस्य वा शः। उभयतःशीर्षतुल्यप्रायणीयादियुक्तायां गवि "अदितिरस्युभयतश्शीर्ष्णी" यजु० ४,१६, "उभयतः शीर्षे यस्याः ज्योतिष्टोमस्याद्यन्तयोः प्रायणीयोदयनीययोः शीर्षत्वम् "द्वे शीर्षे प्रायणीयोदयनीये" याज्ञोक्तेः" वेददी०।

**उभयवेतन** पु०उभयोः भेद्ये स्वामिनि च वेतनं यस्य अयच्। दूतभेदे यो हि स्वामिसकाशात् प्रच्छन्नां भृतिं गृहीत्वा तद्भेद्यशत्रुसकाशे तदीयदासत्वेनात्मानं ख्यापयित्वा तत्सकाशात् भृतिं गृह्णन्नपि पूर्वस्वामिनोगृहीतभृतिनिष्क्रयार्थमुत्तरस्य सचिवादिभेदं जनयति स उभयवेतन इत्युच्यते। "अज्ञातदोषैर्दोषज्ञैरुद्दूष्योभयवेतनैः। भेद्याः शत्रोरभिव्यक्तशासनैः सामवायिकाः" माघः। तादृशदूताश्च मुद्राराक्षसे चाणक्यप्रेषिता बहवो वर्णिताः ते च मलयकेतोः प्रधानसचिवादीन् राक्षसादीन् ततो विभिद्य चाणक्यकार्य्यं साधितवन्तः तच्च तत एवावसेयं विस्तरभयान्नोक्तम्।

**उभयादन्ति** अव्य०उभौ दन्तौ प्रहरणं यत्र युद्धे द्विदण्ड्या० इच् समा०अयच्। उभयदन्तसाध्ये युद्धे एवम् उभयाञ्जलि उभयाबाहु उभयाहस्ति उभयाकर्णि इत्यादयोऽपि नि० साध्याः तत्तत्साधनयुद्धे। उभाहस्ति उभाकर्णि उभाबाहु उभादन्ति इत्यादयः नि० साध्याः तत्र नायच्। तेऽपि तत्तदर्थेषु।

**उम्** अव्य० उ–बा०डुमि। १रोषे, २स्वीकारे, ३प्रश्ने च।

**उमा** स्त्री ओः शिवस्य मा लक्ष्मीरिव उं शिवं माति मन्यते पतित्वेन मा+क वा। शिवपत्न्याम् १दुर्गायाम् "उ मेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी, जगामेति" कुमारे निरुक्तायां २पार्व्वत्याम्। "यदाह तपसे पुत्रीं वनं गन्तुञ्च मेनका। उ मेति,तेन सोमेति नाम प्राप तदा सती" कालि०पु०। "मात्रा निषिद्धा तपसे यदा सा ययावुमाख्यां भवभक्तिभाविनी" शिवपु०अत्र पक्षे उ मेति शब्दः नामहेतुत्वेनास्त्यस्याः अर्श आ०अच् "यस्येति" पा० आल्लोपे टाप्। "उमामुखे विम्बफलाधरोष्ठे" "उमामुखन्तु प्रतिपद्य लोला" "उमाह्वयेषा ते यूयम्" "उमा वधूर्भवान् दाता" इति च कुमा०। "नियोजयितुकामस्तु उमायां चन्द्रशेखरम्" शि०पु०। उमामाहेश्वरव्रतम्। व्रतशब्दे वक्ष्यते। वे–बा०मक् संप्रसारणम्। ३हरिद्रायाम् ४अतसीवृक्षे (मसिना) उमाकटः उम्यः औमीनः। ५कीर्त्तौ ६कान्तौ, ७शान्तौ च।